# प्रमाणलक्षणम्

अशेषगुरुमीशेशं नारायणमनामयम् ।
संप्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् । १ ।

यथार्थं प्रमाणम् । तद्द्विविधम् । केवलमनुप्रमाणं च । यथार्थज्ञानं केवलम् । तत्साधनमनुप्रमाणम् । केवलं चतुर्विधम् । ईशलक्ष्मीयोग्ययोगिभेदेन । पूर्वद्वयमनादि नित्यम् । स्वातन्त्र्यपारतन्त्र्याभ्यां तद्विशेषः । पूर्वं स्वपरगताखिलविशेषविषयम् । द्वितीयमीशेऽन्येभ्योऽधिकम् । असार्वत्रिकम् । अन्यत्र सर्वविषयम् । स्पष्टत्वे भेदः । योगिनामृजूनामनादिनित्यम् । ईशे जीवेभ्योऽधिकम् । अन्यत्रालोचने सर्वविषयम् । क्रमेण वर्धमानं आमुक्तेः । ततोऽव्ययम् । ततोऽर्वाक्क्रमेण ह्रासितम्। सादि च तात्त्विकेभ्योऽन्यत्र । अयोगिज्ञानमुत्पत्तिविनाशवत् । अल्पम्। अनुप्रमाणं त्रिविधम् । प्रत्यक्षमनुमानमागम इति । निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् । निर्दोषोपपत्तिरनुमानम् । निर्दोषः शब्द आगमः । अर्थापत्त्युपमे अनुमाविशेषः ।

अभावोऽनुमा प्रत्यक्षं च । परामर्शापरामर्शविशेषात् । सम्भवपरिशेषावनुमा । आत्मान्योन्याश्रयचक्रकानवस्थाकल्पनागौरवश्रुतदृष्टहानादयो दूषणानुमा । उपक्रमोपसंहारतदैकरूप्याभ्यासा पूर्वता फलार्थवादाश्च उपपत्तिविशेषाः । त एव सोपपत्तयो लिङ्गानि । समाख्यावाक्यप्रकरणस्थानानि च लिङ्गविशेषाः । व्याप्तिरुपपत्तिमूलम् । सा प्रतिज्ञाहेतुदृष्टान्तरूपा । हेतुगर्भा प्रतिज्ञा केवलाऽपि । सिद्धौ प्रतिज्ञायां हेतुमात्रं च । दृष्टान्तः सप्रतिज्ञो हेतुगर्भः उपपत्तिदोषौ विरोधासङ्गती । न्यूनाधिके वाचनिके । संवादानुक्तियुता निग्रहाः । प्रत्यक्षं सप्तविधम् । साक्षिषडिन्द्रियभेदेन । मानसप्रत्यक्षजा स्मृतिः । स्मृत्यनुवादयोर्नाप्रामाण्यम् । यथार्थत्वानुभवात् । अहानेश्च । विरोधो मानस्ववाक्याभ्याम्। स्ववाक्यविरोधोऽपसिद्धान्तजातिरूपेण । जातिः - न मेये मानापेक्षेत्यादिका । मेये मानापेक्षास्तीति च तेनैव न्यायेन सिद्धत्वात् । मानविरोधश्च । छलमसङ्गतम् । अन्यच्च । गृष्टिविवक्षया गामानयेत्युक्ते पृथिवीविवक्षया गवानयनमशक्यमितिवत् । त्रिविधो विरोधः । प्रतिज्ञाहेतुदृष्टान्तभेदेन । प्रमाणविरुद्धार्थप्रतिज्ञा प्रतिज्ञाविरोधः । हेतुस्वरूपासिद्धिरव्याप्तिश्चेति हेतुविरोधः । साध्यस्य साधनस्य वाऽननुगमो दृष्टा । प्रतिज्ञायाः समबलविरोध एव सप्रतिसाधनः । स एवोपाधिदोषोऽपि । सर्व एते दृश्यत्वानुमाने द्रष्टव्याः । प्रत्यक्षागमादिभिर्जगतः सत्यत्वात् तत्पक्षे दृश्यत्वस्य च मिथ्यात्वात् । अनिर्वचनीयस्य प्रतिवादिनोऽसिद्धत्वात् । आत्मनोऽपि दृश्यत्वात् । शुक्तिरजतादेरनिर्वचनीयत्वाभावात्। अनिर्वचनीयदृश्यत्वाभावात् । मानससिद्धत्वादिति सप्रतिसाधनत्वाच्च । जगत्सत्यत्वग्राहि प्रत्यक्षस्य वर्तमानमात्रग्राहित्वे अनुमानागमप्रामाण्यग्राहिणोऽपि प्रत्यक्षत्वाविशेषादुत्तरक्षणे प्रामाणयं न सेत्स्यति इति भेदादि वाक्यानामेव प्रामाण्यं स्यात् । तस्य साक्षिसिद्धत्वं चेज्जगत्सत्यत्वमपि साक्षिसिद्धम् । व्यभिचारश्चेदागमार्थानुमानिर्दोषत्वाध्यवसाये च समः । अत उत्तरदिवसेऽभेदवाक्यस्य भेदोऽर्थः स्यात् । निर्दोषानुमायाः सदोषत्वं, सदोषानुमाया निर्दोषत्वं इत्यव्यवस्था । आश्रयसाध्यव्यधिकरणासिद्ध्यो न दूषणं अतिप्रसङ्गेन हि दोषत्वादोषत्वे कल्प्ये । असदाश्रयस्य साधकत्वं नेत्यपि व्याप्तिं विना कथं निवार्यते । असदाश्रयमित्यादिविशेषणत्वसंभवे कथमव्याप्तिः ।

न चात्यन्ताभावोऽपि सर्वधर्मरहितः । प्रमेयत्वाद्यनुभवात् । परिशेषार्थापत्तिप्रामाण्याभ्युपगमाच्च । विमतं सकर्तृकमित्यत्र सर्वज्ञत्वस्य पक्षधर्मता बलेन सिद्ध्यङ्गीकारात् । परिशेषोऽर्थापत्तिरनुमानमित्यविशेषः । उपपत्तिमात्रत्वात् । उपपत्तेश्च व्याप्त्यपेक्षा सर्वथाङ्गीकार्येत्याग्रहमात्रेण भेदः । उपमानस्यापि व्याप्तिरूपत्वात् । न हि स्वसदृशेनासदृशं क्वचिद्दृष्टं । योग्यानुपलब्धेश्च लिङ्गत्वं अविशेषात् । उक्तदोषेष्वेवशेषानुमानदोषाणां अन्तर्भावः ।

साध्याविशिष्टोऽसिद्धः । सिद्धसाधकोऽसंगतः । न प्रमासाधनं प्रमाणं । ज्ञानव्यतिरिक्तायां प्रमायां प्रमाणाभावात् । न चाज्ञातपरिच्छित्तिरेव प्रमेत्यत्र किञ्चिन्मानं । याथार्थ्यमेव प्रामाण्यमित्यङ्गीकारात् । न चानुभूतिरेव प्रमाणम् । स्मृत्यादावव्याप्तेः । वेदानुमानादिप्रामाण्यप्रसिद्धेश्च । 'स्मृतिः प्रत्यक्षं ऐतिह्यं अनुमानं चतुष्टयम् । प्रमाणामिति विज्ञेयं धर्माद्यर्थे बुभूषुभिः' इति श्रुतेश्च । ऐतिह्यमागमभेदः । न च सम्यगनुभवसाधनं

प्रमाणम् । ईश्वरज्ञानादावव्याप्तेः । अप्रमाण्ये प्रमाणाभावाच्च । प्रमाण्यज्ञाने च । तत्राप्यङ्गीकारेऽनवस्थितेः । स्वप्रकाशात्माङ्गीकारे तत्राव्याप्तेः । स्मृतेश्च प्रमाणाङ्गीकारेऽनवस्थितेः । स्वप्रकाशात्माङ्गीकारे तत्राव्याप्तेः । स्मृतेश्च प्रामाण्यानङ्गीकारे अनुभूतं मयेत्यत्र प्रमाणाभावात् । लीङ्गित्वेन प्रामाण्ये कल्पनागौरम् । दृष्टहानिश्च । स्मृतिप्रमाणद्वैविध्यमात्रकल्पने मिथ्याज्ञानादेर्निरासात् अनुभवविरोधः । तदनुभवाभाव इत्युक्ते अनुभवः स्मृतिश्च नास्तीत्युक्ते किमुत्तरम् । स्वसिद्धैः साधनं परसिद्धैर्दूषणम् । अतो न दूषणे अपसिद्धान्तादि । इष्टापत्तिः सिद्धसाधनत्वादसङ्गतमेव ।

आनन्दतीर्थमुनिना ब्रह्मतर्कोक्तमार्गतः ।
मानलक्षणमित्युक्तं संक्षेपाद्ब्रह्मसिद्धये ।
अशेषमानमेयैकसाक्षिणेऽक्षयमूर्तये ।
अजेशपुरुहूतेड्य नमो नारायणाय ते ।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं प्रमाणलक्षणम् सम्पूर्ण